# PART - II

## वेदांगज्योतिषम्

## (ऋक्पाठः)

## श्रीगणेशाय नमः। हरिः ॐ।।

पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिम्।
दिनर्त्वयनमासाङ्गं प्रणम्य शिरसा शुचिः।।१।।
प्रणम्य शिरसा कालमभिवाद्य सरस्वतीम्।
कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः।।२।।
ज्योतिषामयनं कृत्स्नं प्रवक्ष्यामनुपूर्वशः।
विप्राणां संमतं लोके यज्ञकालार्थसिद्धये।।३।।
निरेकं द्वादशार्धाब्दं द्विगुणं गतसंज्ञिकम्।
षष्ट्या षष्ट्या युतं द्वाभ्यां पर्वणां राशिरुच्यते।।४।।

स्वरार्कमेके सोमार्कौ यदा साकं सवासवौ।
स्यात्तदादियुगं माघस्तपःशुक्लो दिनंत्यजः।।५।।
प्रपद्येते श्रविष्ठादौ सूर्याचान्द्रमसावुदक्।
सार्पार्धे दक्षिणार्कस्तु माघश्रावणयोः सदा।।६।।
धर्मवृद्धिरपां प्रस्थः क्षपाह्रास उदगतौ।
दक्षिणे तौ विपर्यस्तौ षण्मुहूर्त्ययनेन तु।।७।।
द्विगुणं सप्तमं चाहुरयनाद्यं त्रयोदश।
चतुर्थं दशमं चैव द्विर्युग्माद्यं बहुलेप्यृतौ।।८।।

वसुस्त्वष्टा भगोजश्च मित्रः सर्पाश्विनौ जलम्।
धाता कश्चायनाद्याश्चार्धपञ्च नभस्त्वृतुः।।९।।
भांशाः स्युरष्टकाः कार्याः पक्षा द्वादश चोद्गताः।
एकादशगुणस्योनः शुक्लेर्धं चैन्दवा यदि।।१०।।
कार्या भांशाष्टकास्थाने कला एकान्नविंशतिः।
ऊनस्थाने द्विसप्ततीरुद्वपेदूनसंमिताः।।११।।

त्र्यहंशीभशेषो दिवसांशभागश्चतुर्दशस्याप्युपनीतभिन्नम्।
भार्धेधिके चाधिगते परेंशे द्वावुत्तमैकं नवकैरवेद्यम्।।१२।।

पक्षात्पञ्चदशाच्चोर्ध्वं तद् भुक्तमिति निर्दिशेत्।
नवभिस्तूद्गतोंशः स्यादूनांशद्व्यधिकेन तु।।१३।।
जौद्राघः खेश्वे हीरोषाचिन्मूषण्यः सोमाधानः।
रेमृघ्राश्वा ओजस्तृष्नो हर्येष्टा इत्यृक्षालिङ्गैः।।१४।।
जावाद्यंशैः समं विद्यात्पूर्वार्धे पार्वसूत्तरे।
भादानांशाच्चतुर्दशी काष्ठानांदेविनाकलाः।।१५।।
कला दश च विंशा स्याद् द्विमुहूर्तस्तु नाडिके।
द्विर्त्रिंशस्तत्कलानां तु षट्शती त्र्यधिकं भवेत्।।१६।।

नाडिके द्वे मुहूर्तस्तु पञ्चाशत्पलमाषकम्।
माषकात्कुम्भको द्रोणः कुटपैर्वर्धते त्रिभिः।।१७।।
ससप्तकुंभयुक्स्योनः सूर्याद्योनिं त्रयोदश।
नवमानि च पञ्चाह्नः काष्ठा पञ्चाक्षराः स्मृताः।।१८।।
श्रविष्ठाभ्यां गुणाभ्यस्तान् प्राग्विलग्नान्विनिर्दिशेत्।
सूर्यान्मासान्षळभ्यस्तान् विद्याच्चान्द्रमसान् ऋतून्।।१९।।
अतीतपर्वभागेषु शोधयेद् द्विगुणां तिथिम्।
तेषु मण्डलभागेषु तिथिनिष्ठां गतो रविः।।२०।।

याः पर्वभादानकलास्तासु सप्तगुणां तिथिम्।
प्रक्षिपेत्कलासमूहस्तु विद्यादादानकीः कलाः।।२१।।
यदुत्तरस्यायनतोयनं स्याच्छेषं तु यद्दक्षिणतोयनस्य।
तदेव षष्ट्या द्विगुणं द्विभक्तं स द्वादशं स्याद्दिवसप्रमाणम्।।२२।।
तदर्धं दिनभागानां सदा पर्वणि पर्वणि।
ऋतुशेषं तु तद्विद्यात्संख्याय सहपर्वणाम्।।२३।।
इत्युपायसमुद्देशो भूयोप्येनं प्रकल्पयेत्।
ज्ञेयराशिं गताभ्यस्तान् विभजेज्ज्ञानराशिषु।।२४।।

अग्निः प्रजापतिः सोमो रुद्रोदितिर्बृहस्पतिः।
सर्पाश्च पितरश्चैव भगश्चैवार्यमापि च।।२५।।
सविता त्वष्टाथ वायुश्चेन्द्राग्नी मित्र एव च।
इन्द्रो निर्ऋतिरापो वै विश्वेदेवास्तथैव च।।२६।।

विष्णुर्वसवो वरुणोज एकपात्तथैव च।
अहिर्बुध्न्यस्तथा पूषाश्विनौ यम एव च।।२७।।
नक्षत्रदेवता एता एताभिर्यज्ञकर्मणि।
यजमानस्य शास्त्रज्ञैर्नामनक्षत्रजं स्मृतम्।।२८।।

इत्येतन् मासवर्षाणां मुहूर्तोदयपर्वणाम्।
दिनर्त्वयनमासांगं व्याख्यातं लगधोऽब्रवीत्।।२९।।
सोमसूर्यस्त्रिचरितो लोकाँल्लोके च संमितम्।
सोमसूर्यस्त्रिचरितो विद्वान् वेदविदश्नुते।।३०।।
विषुवं तद्गुणं द्वाभ्यां रूपहीनं तु षड्गुणम्।
यल्लब्धं तानि पर्वाणि तथोर्ध्वं सा तिथिर्भवेत्।।३१।।
माघशुक्लप्रवृत्तस्तु पौषकृष्णसमापिनः।
युगस्य पञ्चवर्षाणि कालज्ञानं प्रचक्षते।।३२।।

तृतीयां नवमीं चैव पौर्णमासीं त्रयोदशीम्।
षष्ठीं च विषुवां प्रोक्तो द्वादश्यां च समं भवेत्।।३३।।
चतुर्दशीमुपवसथस्तथा भवेद्यथोदितो दिनमुपैति चंद्रमाः।
माघशुक्लाह्निको युंक्ते श्रविष्ठायां च वार्षिकीम्।।३४।।
यथा शिखा मयूराणां नागानां मणयो यथा।
तद्वद् वेदाङ्गशास्त्राणां ज्योतिषं मूर्धनि स्थितम्।।३५।।
वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः।
तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान्
यो ज्योतिषं वेद स वेद यज्ञानिति।।३६।।

पञ्च संवत्सरं प्रपद्येते कार्याः कला दश च याः पर्वसंविता
विषुवं सप्त।। इति वेदांगज्योतिषं समाप्तम्।।

# PART - V

## याजुषज्योतिषम् (YUJ)

अथ याजुषज्योतिषं प्रारभ्यते।
पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिम्।
दिनर्त्वयनमासाङ्गं प्रणम्य शिरसा शुचिः।।१
ज्योतिषामयनं पुण्यं प्रवक्ष्याम्यनुपूर्वशः।
संमतं ब्राह्मणेन्द्राणां यज्ञकालार्थसिद्धये।।२
वेदा हि यज्ञार्थमभिप्रवृत्ताः
कालानुपूर्व्या विहिताश्च यज्ञाः।
तस्मादिदं कालविधानशास्त्रं
यो ज्योतिषं वेद स वेद यज्ञम्।।३
यथा शिखा मयूराणां नागानां मणयो यथा।
तद्वद् वेदाङ्गशास्त्राणां गणितं मूर्धनि स्थितम्।।४
[ये बृहस्पतिना भुक्ता मीनान्प्रभृति राशयः।
त्रिवृताः पञ्चभिर्नृता यः शेषः स परिग्रहः।।४-०]
माघशुक्लप्रपन्नस्य पौषकृष्णसमापिनः।
युगस्य पञ्चवर्षस्य कालज्ञानं प्रचक्षते।।५

स्वराक्रमेते सोमार्कौ यदा साकं सवासवौ।
स्यात् तदादि युगं माघस्तपः शुक्लोऽयनं ह्युदक्।।६
प्रपद्येते श्रविष्ठादौ सूर्याचन्द्रमसावुदक्।
सार्पार्धे दक्षिणार्कस्तु माघश्रावणयोः सदा।।७
धर्मवृद्धिरपां प्रस्थः क्षपाह्रास उदग्गतौ।
दक्षिणे तौ विपर्यस्तौ षण्मुहूर्त्ययनेन तु।।८
प्रथमं सप्तमं चाहुरयनाद्यं त्रयोदशम्।
चतुर्थं दशमं चैव द्विर्युग्माद्यं बहुलेऽप्यृतौ।।९
वसुस्त्वष्टा भवोऽजश्च मित्रः सर्पोऽश्विनौ जलम्।
धाता कश्चायनाद्याः स्युरर्धपञ्चमभस्त्वृतुः।।१०

एकान्तरेऽह्नि मासे च पूर्वान् कृत्वादिरुत्तरः।
अर्धयोः पञ्चपर्वाणां मृदू पञ्चदशाष्टमौ।।११

दुहेयं पर्व चेत् पादे पादस्त्रिंशत्तु सैकिका।
भागात्मनापवृज्यांशां निर्दिशेंशोऽधिको यदि।।१२
निरेकं द्वादशाभ्यस्तं द्विगुणं गतसंयुतम्।
षष्ट्या षष्ट्या युतं द्वाभ्यां पर्वणां राशिरुच्यते।।१३
स्युः पदोऽर्धं त्रिपाद्या या त्रिदव्यैकेऽह्नः कृते स्थितिम्।
साम्येनेन्दोः स्तृणोऽन्येषु पर्वकाः पञ्चसंमिताः।।१४
भांशाः स्युरष्टकाः कार्याः पक्षा द्वादशकोद्गताः।
एकादशगुणश्चोनः शुक्लेऽर्धं चैन्दवा यदि।।१५

नवकैरुद्गतोंऽशः स्यादूनः सप्तगुणो भवेत्।
आवापस्त्वयुजेऽर्धं स्यात्पौलस्त्येऽस्तंगतेऽपरम्।।१६
जावाद्यंशैः समं विद्यात् पूर्वार्धे पर्वसूत्तराः।
भादानं स्याच्चतुर्दश्यां द्विभागेभ्योऽधिको यदि।।१७
जौ द्रा गः खे श्वेऽही रो शा
चि(न्) मूषण्यः सू मा धा नः।
रे मृ घा स्वा ऽपो ऽजः कृ
ष्य ह ज्ये ष्ठा इत्यृक्षा लिङ्गैः।।१८
कार्या भांशाष्टकस्थाने कला एकान्नविंशतिः।
ऊनस्थाने द्विसप्ततिमुद्वपेद् युक्तसंभवे।।१९
तिथिमेकादशाभ्यस्तां पर्वभांशसमन्विताम्।
विभज्य भसमूहेन तिथिनक्षत्रमादिशेत्।।२०

याः पर्वभादानकलास्तासु सप्तगुणां तिथिम्।
उक्तास्तासां विजानीयात् तिथिभादानिकाः कलाः।।२१
अतीतपर्वभागेभ्यः शोधयेद् द्विगुणां तिथिम्।
तेषु मण्डलभागेषु तिथिनिष्ठां गतो रविः।।२२
विषुवन्तं द्विरभ्यस्तं रूपोनं षड्गुणीकृतम्।
पक्षा यदर्धं पक्षाणां तिथिः स विषुवान् स्मृतः।।२३

पलानि पञ्चाशदपां धृतानि
तदाढकं द्रोणमतः प्रमेयम्।
त्रिभिर्विहीनं कुडवैस्तु कार्यं
तन्नाडिकायास्तु भवेत्प्रमाणम्।।२४
एकादशभिरभ्यस्य पर्वाणि नवभिस्तिथिम्।
युगलब्धं सपर्व स्याद् वर्तमानार्कभक्रमात्।।२५

सूर्यर्क्षभागान्नवभिर्विभज्य
शेषं द्विरभ्यस्य दिनोपभुक्तिः।
तिथियुक्ता भुक्तिदिनेषु कालो
योगं दिनैकादशकेन तद् भम्।।२६
त्रियंशो भशेषो दिवसांशभागश्
चतुर्दशश्चाप्यनीयभिन्नम्।
भार्धेऽधिके चापि गते परोंऽशो
द्वावुत्तमे तन्नवकैरवेद्यम्।।२७
त्रिंशत्यह्नां सषट्षष्टिरब्दः षट् चर्तवोऽयने।
मासा द्वादश सूर्याः स्युरेतत् पञ्चगुणं युगम्।।२८
उदया वासवस्य स्युर्दिनराशिः स्वपञ्चकः।
ऋषेर्द्विषष्टिहीनं स्याद्विंशत्या चैकया स्तृणाम्।।२९
पञ्चत्रिंशं शतं पौष्णमेकोनमयनान्यृषेः।
पर्वणां स्याच्चतुष्पादी काष्ठानां चैव ताः कलाः।।३०

सावनेन्दुस्त्रिमासानां षष्टिश्चैका द्विसप्तिका।
द्वित्रिंशतम् सावनस्यार्धः सूर्यः स्तृणां स पर्ययः।।३१
अग्निः प्रजापतिः सोमो रुद्रोऽदितिर्बृहस्पतिः।
सर्पाश्च पितरश्चैव भगश्चैवार्यमाऽपि च।।३२
सविता त्वष्टाऽथ वायुश्चेन्द्राग्नी मित्र एव च।
इन्द्रो निर्ऋतिरापो वै विश्वेदेवास्तथैव च।।३३
विष्णुर्वसवो वरुणोऽज एकपात् तथैव च।
अहिर्बुध्न्यस्तथा पूषा अश्विनौ यम एव च।।३४
नक्षत्रदेवता ह्येता एताभिर्यज्ञकर्मणि।
यजमानस्य शास्त्रज्ञैर्नाम नक्षत्रजं स्मृतम्।।३५

उग्राण्यार्द्रा च चित्रा च विशाखा श्रवणाऽश्वयुक्।
क्रूराणि तु मघा स्वातिर्ज्येष्ठा मूलं यमस्य यत्।।३६
द्व्यूनं द्विषष्टिभागेन हेयं सौर्यात् सपार्वणम्।
यत्कृतावुपयुज्येते मध्येऽन्तं चाधिमासकौ।।३७
कला दश सविंशा स्याद् द्वे मुहूर्तस्य नाडिके।
द्वित्रिंशत् तत्कलानां तु षट्छती त्र्यधिका भवेत्।।३८
ससप्तकं भयुक् सोमः सूर्यो द्यूनि त्रयोदश।
उत्तमानि तु पञ्चाह्नः काष्ठा पञ्चाक्षरा भवेत्।।३९

यदुत्तरस्यायनतो गतं स्याच्
छेषं तथा दक्षिणतोऽयनस्य।
तदेव षष्ट्या द्विगुणं द्विभक्तं
सद्वादशं स्याद् दिवसप्रमाणम्।।४०

यदर्धं दिनभागानां सदा पर्वणि पर्वणि।
ऋतुशेषं तु तद् विद्यात् संख्याय सह पर्वणाम्।।४१
इत्युपायसमुद्देशो भूयोऽप्यह्नः प्रकल्पयेत्।
ज्ञेयराशिगतान् व्यस्तान् विभजेज्ज्ञानराशिना।।४२
[इत्येवं मासवर्षाणां मुहूर्तोदयपर्वणाम्।
दिनर्त्वयनमासाङ्गं व्याख्यानं लगतोऽब्रवीत्।।४२-०]
सोमसूर्यस्त्रिचरितं विद्वान् वेदविदश्नुते।
सोयसूर्यस्त्रिचरितं लोकं लोके च संततिं
लोकं लोके च संततिम्।।४३

इति याजुषज्योतिषं समाप्तम्।।